*ACP-I/Sanskrit-103C-MIL-1/19*

# B.A. Semester I (Honours/General) Examination, 2018-19

## SANSKRIT

**Course ID : 10919** **Course Code : ACPSNS-103C-MIL-1**

Course Title: MIL-1

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** अधोलिखितेषु परिच्छेदेषु *एकस्य* परिच्छेदस्य पाठपूर्वकं प्रश्नानाम् उत्तराणि लिखतु। 10×1=10

(a) अहमेकदा दक्षिणारण्ये चरन्नपश्यम् – एको वृद्धव्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते – भोः भोः पान्थाः! इदं सुवर्णकङ्कणं गृह्यताम्। ततो लोभाकृष्टेन केनचित् पान्थेनालोचितम् – भाग्येनैतत् सम्भवति। तन्निरुपयामि तावत्। प्रकाशं ब्रूते – कुत्र तव कङ्कणम् ? व्याघ्रो हस्तं प्रसार्य दर्शयति। पान्थोऽवदत् – कथं मारात्मके त्वयि विश्वासः? व्याघ्र उवाच – शृणु रे पान्थः प्रागेव यौवनदशायामतिदुर्वृत्त आसम्। अनेकगोमानुषाणां वधान्मे पुत्रा मृता दाराश्च। वंशहीनश्चाहम्। ततः केनचिद् धार्मिकेणाहमादिष्टः – दानधर्मादिकं चरतु भवान् इति।

(i) व्याघ्रस्य हस्ते किमासीत्? 1

(ii) व्याघ्रः किं दातुमिच्छति स्म? 1

(iii) पान्थः कुत्र व्याघ्रमपश्यत्? 1

(iv) पान्थः व्याघ्रं किमपृच्छत्? 2

(v) व्याघ्रेण किमुक्तम् 3

(vi) कथं पान्थः लोभाकृष्टः अभवत्? 2

(b) कस्यचिन्नृपस्य महिषीद्वयमासीत्–सुभगा दुर्भगा च। राजगृहे सुभगायाः राज्ञ्याः परमादरः प्रयत्नश्च। सुभगा महिषी सप्तशाले प्रासादे तिष्ठति। परिचारिकानां सप्तशती तां सेवते, चरणयुगलं प्रक्ष्याल्य अलक्तकरागेण तद् रञ्जयति, केशं विरचयति च। उद्यानसप्तकस्य सप्तभाजनपूर्णानि कुसुमानि, तेन कुसुमचयेन कनीयसी महिषी स्रजं ग्रन्थाति। सुभगा सहिषी खलु नृपस्य जीवनम्। अन्यतो दुर्भगा सहिषी ज्यायसी, तस्या भृशमनादर अयत्नश्च। राजा विषनयनेन तां पश्यति। गृहमेकं तस्यै प्रदत्तं तदपि भग्नम्, एका दासी प्रदत्ता, सापि मूका बधिरा च। परिधानाय जीर्णा शाटिका, शयनाय छिन्ना च कन्था। तस्या गृहं राजा दिनमेकमागच्छति, मुहूर्तकमुपविशति, वचनमेकमुक्त्वा निर्गच्छति। सुभगा तु कनीयसी महिषी, तस्या एव गृहं भुपतिः सम्वत्सरमधितिष्ठति।

(i) राजा कनीयस्या महिष्या सह कीदृशं व्यवहारं करोति? 2

(ii) सुभगा महिषी केन प्रकारेण दिनं यापयति? 2

(iii) 'राजा विषनयनेन तां पश्यति' – वाक्यस्य वाच्यपरिवर्तनं करणीयम्। 2

(iv) राज्ञः महिषीद्वयष्य नामनी के? तयोः मध्ये कस्यां राज्ञः अधिकादरः? 2

(v) 'मुहूर्तकमुपविशति' – अत्र रेखाङ्कितपदे कथं का विभक्तिः? 2

(c) एकः नृपतिः बभूव। स निःसन्तान आसीत्। एकदा मृगयायै गत्वा सः सन्यासिनमेकं प्राप्तवान्। तस्य सन्यासिनः पुरतः यदा सः नृपतिस्तस्य निःसन्तानत्वं वर्णयामास तदा तेन सन्यासिना तस्मै किञ्चित् वृक्षवीजं दत्वा एवमुक्तम् – 'वृक्षवीजमिदं तदीयभार्या भक्षयतु, तेन तस्याः द्वौ पुत्रौ भविष्यतः, परन्तु तयोः प्रथमः पुत्रः मह्यं देयः।' राज्ञा तत्सर्वमङ्गीकृत्य वृक्षवीजं नीत्वा गृहं प्रत्यागतम्। गृहं प्राप्य च तदत्तुं भार्यायै प्राददात्। कियद्दिनानन्तरं महिषी यथाक्रमं पुत्रद्वयं जनितवती। शनैः शनैः पुत्रद्वयमवर्धत, परस्परं तौ प्रीतिमाप्नुवन्तौ मिलित्वा च क्रीडामकुरुताम्। तयोः रूपमवलोक्य राजा आनन्दाप्लुतो जातः, एवं सन्यासिने दत्तवाक्यं तेन विस्मृतम्। अन्यत्र सः सन्यामी दिनादिकं गणयित्वा समयं यापितवान्। तयोः बालकयोः प्रथमस्तु षोडशवर्षीयः द्वितीयश्च पञ्चदशवर्षीयः यदाभवताम् तदा एकदा सः सन्यासी राजपुरमुपस्थितवान्, अपि च नृपतिं पूर्वमेव दत्तवचनं स्मारयित्वा ज्यायांसं पुत्रमयाचत। निरुपायो भूत्वा सः राजा तदीयज्यायांसं पुत्रं सन्यासिने समर्पयति स्म।

(i) वने राज्ञः सन्यासिनः च वार्तालापं स्वभाषया लिखतु। 2

(ii) कदा सन्यासी राजसकाशमुपस्थितवान्? 2

(iii) 'एकः नृपतिः बभूव' – इत्यस्य वाक्यस्य वाच्यान्तरं विधेयम्। 2

(iv) वीजभक्षणस्य फलं किमासीत्? 2

(v) पुत्रद्वयं कथं कालं यापयति स्म? 2

**2.** द्वयोः मध्ये *एकस्य* शब्दस्य रूपाणि लिखतु। 5×1=5

(a) साधुशब्दः

(b) गुणिन्शब्दः

**3.** त्रिषु *द्वयोः* धात्वोः रूपाणि लिखतु। 5×2=10

(a) दा-धातोः लट्लकारे लृट्लकारे च रूपाणि लिखतु।

(b) गम्-धातोः लङ्लकारे लोट्लकारे च रूपाणि लिखतु।

(c) सेव्-धातोः लट्लकारे लृट्लकारे च रूपाणि लिखतु।

**4.** अधस्तनेषु रेखाङ्कितेषु पदेषु *पञ्चनां* सकारण-विभक्तिनिर्देशं कुर्वन्तु। 2×5=10

(a) अश्वः मन्दं धावति।

(b) गुरोः शास्त्रम् अधीते।

(c) मासं व्याकरणमपठत्।

(d) कुण्डलाय हिरण्यम्।

(e) बालकः कटे आस्ते।

(f) सूर्ये उदिते पद्मं प्रकाशते।

(g) ग्रामं परितः नदी।

(h) पिता पुत्रं विद्यालयं गमयति।

**5.** अधोनिर्दिष्टेषु प्रश्नेषु *पञ्च*प्रश्नाः समाधेयाः। 1×5=5

(a) कृ + शानच् इत्यत्र किं परिनिष्ठितं रूपम्?

(b) प्र-दा + ल्यप् इत्यत्र किं रूपम्?

(c) दृश + तव्य इत्यत्र किं रूपम्?

(d) गातुम् इत्यत्र कः धातुः कः च प्रत्ययः?

(e) दर्शनम् इत्यत्र कः धातुः कः च प्रत्ययः?

(f) करणीयम् इत्यत्र कः धातुः कः च प्रत्ययः?

(g) शिष्यः इत्यत्र कः धातुः कः च प्रत्ययः?

*अथवा,*

अधोनिर्दिष्टेषु प्रश्नेषु *पञ्च*प्रश्नाः समाधेयाः। 1×5=5

(a) सेव् + शानच् इत्यत्र किं परिनिष्ठितं रूपम्?

(b) आ + गम् + ल्यप् इत्यत्र किं रूपम्?

(c) कृ + तव्य इत्यत्र किं रूपम्?

(d) द्रष्टुम् इत्यत्र को धातुः कः च प्रत्ययः?

(e) पठनीयम् इत्यत्र को धातुः कः च प्रत्ययः?

(f) गच्छन् इत्यत्र को धातुः कश्च प्रत्ययः?

(g) स्नात्वा इत्यत्र को धातुः कश्च प्रत्ययः?

(h) उक्तवा इत्यत्र को धातुः कश्च प्रत्ययः?

---